**दिनाङ्क :- 25/03/2025** **सायम् - 06:20**

**आदौ मुख्यवार्ताः**

- दिल्लीप्रदेशस्य मुख्यमन्त्री रेखागुप्ता अस्मै सत्राय लक्षैककोटि-रूप्यकाणां व्ययायपत्रकं प्रस्तुतवती; महिला-समृद्धि-योजनायै एकपञ्चाशतशत-कोटिरूप्यकाणि, आयुष्मानयोजनायै द्विसहस्र-कोटितोऽधिक-रूप्यकाणि, मार्गादिभ्यश्च अष्टत्रिंशत्शत-कोटितोधिकानि रूप्यकाणि आवंटितानि सन्ति।
- लोकसभया अस्मै वर्षाय वित्तविधेयकम् अङ्गीकृतम्।
- राज्यसभायाः सभापतिना जगदीपधनखड़ेन अद्य सदनस्य नेतॄणां समुपवेशनम् दिल्ली-उच्च न्यायालयस्य न्यायाधीशस्य यशवन्त-वर्मणः गृहात् प्राप्त-धनप्रकरणे चर्चार्थं आकारितमस्ति।
- छत्तीसगढ़स्य दन्तेवाड़ाजनपदे अद्य सुरक्षाबलैस्सह संघर्षे त्रयः माओवादिनः मृताः।
- इण्डियन-प्रीमियर-लीग इत्याख्यायां क्रिकेटक्रीडास्पर्धा-मालिकायां गुजरात टाइटंस् इति दलस्य साम्मुख्यं संध्यायामद्य पंजाब किंग्स इति दलेन सह भविष्यति।

**अथ वार्ताः विस्तरेण**

**दिल्लीप्रदेशस्य मुख्यमन्त्री / आयव्यय-पत्रकम्**

दिल्लीप्रदेशस्य मुख्यमन्त्री रेखागुप्ता इत्येषाद्य विधानसभासभायाम् अस्य वित्तवर्षस्य स्व-सर्वकारस्य आयव्यय-पत्रकं प्रकाशितवती। मुख्यमन्त्रिणः पार्श्वे वित्तमन्त्रालयस्यापि कार्यभारमस्ति। एषः भाजपानेतृत्वयुतस्य दिल्ल्याः नवनिर्वाचित-सर्वकारस्य प्रथमः आयव्ययकः वर्तते। सदने रेखागुप्ता इत्यनया प्रोदीरितं यत् एकलक्षकोटिरूप्यकाणां आयव्ययके दिल्लीराज्यस्य विविधक्षेत्राणां विकासाय उन्नतये च अधिकं बलं प्रदत्तमस्ति। मुख्यमन्त्रिणा समुद्घोषितं यत् अस्मिन् आयव्ययके अष्टाविंशतिसहस्रकोटितो-ऽप्यधिक-रूप्यकाणां परिव्ययार्थं प्रावधानमस्ति यत्तु गतवर्षापेक्षया प्रायः द्विगुणितं विद्यते। दिल्लीसर्वकारेण महिला-योजनान्तर्गतं आयव्ययके एकपञ्चाशतकोटिरूप्यकाणां प्रावधानं विहितमस्ति।

रेखागुप्ता इत्यनया घोषितं यत् सर्वकारेण राष्ट्रीय-राजधान्याः विभिन्नेषु शतक्षेत्रेषु अटल-कैंटिन इत्येतेषां स्थापनार्थं शतकोटिरूप्यकाणामपि प्रावधानं कृतम्।

स्वीयायव्ययकस्य ऐतिहासिकत्वं प्रतिपादयन्त्या तया प्रोक्तं यत् एषः केवलं वित्तीयलेखः नास्ति अपितु विकृतार्थिक-व्यवस्थातः विकसित-दिल्लीप्रदेशत्वेन परिवर्तनार्थं आयव्ययकः वर्तते। दिल्लीविधानसभायाः सत्रमिदं अस्य मासस्य अष्टाविंशति-दिनाङ्कं यावत् प्रचलिष्यति।

**लोकसभा-वित्तविधेयकम्**

लोकसभया अस्मै वर्षाय वित्तविधेयकम् अङ्गीकृतम्। विधेयकस्यास्य उद्देश्यमस्ति यत् अस्मै वित्तसत्राय केन्द्रप्रशासनस्य वित्तीयप्रस्तावानां प्रभावीकरणमिति। विधेयके -ऽस्मिन् चलायमानाया: चर्चायाः प्रत्युत्तरे वित्तमन्त्रिणा निर्मला-सीतारामन इत्यनया प्रोक्तं यत् वित्तविधेयक-मिदं करदातॄणां सम्मानेन सह व्यापारमपि सरलीकरणदिशि अभूतपूर्वं योगदानं प्रददातीति।

तया उक्तं यत् नूतनकरव्यवस्थान्तर्गतं द्वादशलक्ष-रूप्यकान्तं यावत् आये कथमपि कराधानं न स्वीकरिष्यते। श्रीमत्या सीतारामन इत्यनया घोषणा कृता यत् नूतने आयकरविधेयके अग्रिमप्रावृट्सत्रे चर्चायाः सम्भावना अस्तीति। मन्त्रिणा उक्तं यत् देशीयजनानाम् अपेक्षानुरूपं सप्तचत्वारिंशदधिक-द्विसहस्रतम-वर्षं यावत् विकसितभारतस्य लक्ष्यानुसारं केन्द्रप्रशासनेन अनेन वित्तविधेयकमाध्यमेन अनेके पदक्षेपाः समुत्थापिताः सन्ति। श्रीमत्या सीतारामन इत्यनया प्रोक्तं यत् सीम्नः शुल्केन सम्बन्धितस्य विधेयकस्य उद्देश्यमस्ति यत् शुल्क प्रत्यावर्तनस्य समस्यायाः निवृत्यै टैरिफ इत्यस्य प्रारूपं युक्तियुतं करणमिति।

**विराम:**

**संस्कृतवार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यते। सममेव अयं कार्यक्रम: आकाशवाण्याः अन्तर्जालपटले www.newsonair.gov.in इत्यत्र अथ newsonair चलदूरभाषीय तंत्रांशेपि उपलब्धो भविष्यति।**

**उपराष्ट्रपतिः सदन-नेतृ-उपवेशनम्**

राज्यसभायाः सभापतिना जगदीपधनखड़ेन अद्य सन्ध्यायां सदनस्य नेतॄणां समुपवेशनम् आकारितमस्ति। उपवेशनेऽस्मिन् दिल्ली-उच्च न्यायालयस्य न्यायाधीशस्य यशवन्त-वर्मणः गृहात् प्राप्त-धनप्रकरणे चर्चा चर्चिष्यते। सभापतिना प्रकरणमिमं गभीरतमम् अस्तीति ब्रूवता एतत् संसदः सम्प्रभुता, सर्वोच्चता, प्रासङ्गिकता इत्येताभिस्समं संयुक्तमस्तीति उक्तम्। तेन प्रकरणेऽस्मिन् जवेन कार्याचरणाय मुख्यन्यायाधीशस्य प्रशंसा कृता। तेन एतदपि उक्तं यत् प्रकरणस्यास्य समाधानाय सार्थकी चर्चा भविष्यतीति।

प्रसङ्गेऽस्मिन् राज्यसभायां विपक्षस्य नेत्रा मल्लिकार्जुनखरगे इत्यमुना उपवेशनस्यास्य समाह्वानाय सभापतिनः निर्णयस्य स्वागतं विहितम्।

**मनीष / यशवन्तवर्मा**

कांग्रेसदलस्य सांसदेन तिवारी-मनीषेण दिल्ली-उच्चन्यायालयस्य न्यायाधीशस्य यशवन्तवर्मणः गृहात् सम्प्राप्त- साक्षात्-धनप्रकरणे केन्द्रीयविधिमन्त्रिणा लोकसभायां वक्तव्यं दातव्यमिति अपेक्षा कृतास्ति। संसदः बहिः वार्ताहरैस्सह भाषमाणः श्रीमनीषः उक्तवान् यत् अस्मात् प्रकरणादनन्तरं न्यायिकप्रक्रियया सम्बद्धा: जनाः आधिक्येन चिन्तिताः सन्ति।

**लोकसभा-स्थगनम्**

संसदि अद्य मनरेगा-सम्बन्धित-धनराशेः अप्रवर्तनमालक्ष्य लोकसभायां विरोधप्रदर्शनमभवत्, येन कार्यजातं स्थगितम्। प्रश्नकालक्रमे कांग्रेस-डीएमके-टीएमसीति विपक्षीदलानां सदस्यैः तमिलनाडु-पश्चिमबंगालादिषु विपक्षीशासितराज्येषु अवशिष्ट-धनराशिमालक्ष्य विरोधः प्रदर्शितः। पूरकप्रश्नानां उत्तरप्रदानसमये ग्रामीण-विकास-राज्यमन्त्रिणा चन्द्रशेखर- पेम्मासानी इत्यमुना पश्चिम-बंगालराज्ये मनरेगानिधेः कथित-दुरुपयोगार्थं सहैव योजनायाः क्रियान्वयने अनियमितताये च प्रकाशः उपस्थापितः। केन्द्रीय-ग्रामीण- विकास-मन्त्रिणा शिवराज-सिंह-चौहानेन कथितं यत् केन्द्रसर्वकारः श्रमिकेभ्यः लम्बित-पारश्रमिक-प्रदानार्थं प्रतिबद्धोऽस्ति। तेन सबलं प्रोक्तं यत् सर्वकारः राज्येषु पक्षपातः नैव करोति, सहैव तेन तमिलनाडु-पश्चिमबंगालसर्वकाराभ्यां धनराशेः प्रवर्तनार्थं अनुपालन-प्रतिवेदनस्य प्रस्तुतये आग्रहः कृतः।

अवधेयास्पदमिदं यत् मन्त्रिणः उत्तरेण असन्तुष्टो भूत्वा विपक्षीसदस्यैः सदने विरोधप्रदर्शनं कृतम्।

**छत्तीसगढ़-माओवादिनः**

छत्तीसगढ़स्य दन्तेवाड़ाजनपदे अद्य सुरक्षाबलैस्सह संघर्षे त्रयः माओवादिनः मृताः। सूचनानुसारं सुरक्षाबलानां संयुक्त-समवायेन बीजापुरदन्तेवाड़ा-जनपदयोः सीमावर्तिषु वनक्षेत्रेषु नक्सल-प्रतिकाराभियानं प्रचालितम्। दन्तेवाड़ायाः आरक्षकाधीक्षकेन गौरव-राय इत्यमुना वार्ताहरैस्सह संवादक्रमे विज्ञापितं यत् माओवादिनामुपस्थितेः सूचना संप्राप्य अभियानस्यास्य योजना विनिर्मितेति।

**क्रिकेट-क्रीडा**

इण्डियन-प्रीमियर-लीग इत्याख्यायां क्रिकेटक्रीडास्पर्धा-मालिकायां गुजरात टाइटंस् इति दलस्य साम्मुख्यं संध्यायामद्य पंजाब किंग्स इति दलेन सह भविष्यति। संघर्षोऽयं अहमदाबाद इत्यत्र सार्धसप्त-वादनतः समारप्स्यते। ह्यः डेल्ही कैपिटल्स इति दलेन लखनऊ सुपर जायंटस् इति दलं एकस्य क्रीडकस्य अवशेषे विजितम्।

**।। इति वार्ता:।।**